श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ८२

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ८२

*बाणयुद्धं नृगमोक्षं च*

प्रद्युम्नो रौक्मिणेयः स खलु तव कला शम्बरेणाहृतस्तं
  हत्वा रत्या सहाप्तो निजपुरमहरद्रुक्मिकन्यां च धन्याम्।
तत्पुत्रोऽथानिरुद्धो गुणनिधिरवहद्रोचनां रुक्मिपौत्रीं
  तत्रोद्वाहे गतस्त्वं न्यवधि मुसलिना रुक्म्यपि द्यूतवैरात्॥ १ ॥

बाणस्य सा बलिसुतस्य सहस्रबाहो-
  र्माहेश्वरस्य महिता दुहिता किलोषा।
त्वत्पौत्रमेनमनिरुद्धमदृष्टपूर्वं
  स्वप्नेऽनुभूय भगवन् विरहातुराऽभूत्॥ २ ॥

योगिन्यतीव कुशला खलु चित्रलेखा
  तस्याः सखी विलिखती तरुणानशेषान्।
तत्रानिरुद्धमुषया विदितं निशाया-
  मानेष्ट योगबलतो भवतो निकेतात्॥ ३ ॥

कन्यापुरे दयितया सुखमारमन्तं चैनं कथञ्चन बबन्धुषि शर्वबन्धौ।
श्रीनारदोक्ततदुदन्तदुरन्तरोषैस्त्वं तस्य शोणितपुरं यदुभिर्न्यरुन्धाः॥ ४ ॥

पुरीपालश्शैलप्रियदुहितृनाथोऽस्य भगवान्
  समं भूतव्रातैर्यदुबलमशङ्कं निरुरुधे।
महाप्राणो बाणो झटिति युयुधानेन युयुधे
  गुहः प्रद्युम्नेन त्वमपि पुरहन्त्रा जघटिषे॥ ५ ॥

निरुद्धाशेषास्त्रे मुमुहुषि तवास्त्रेण गिरिशे
    द्रुता भूता भीताः प्रमथकुलवीराः प्रमथिताः।
परास्कन्दत् स्कन्दः कुसुमशरबाणैश्च सचिवः
    स कुम्भाण्डो भाण्डं नवमिव बलेनाशु बिभिदे॥ ६ ॥

चापानां पञ्चशत्या प्रसभमुपगते छिन्नचापेऽथ बाणे
    व्यर्थे याते समेतो ज्वरपतिरशनैरज्वरि त्वज्ज्वरेण।
ज्ञानी स्तुत्वाऽथ दत्वा तव चरितजुषां विज्वरं स ज्वरोऽगात्
    प्रायोऽन्तर्ज्ञानवन्तोऽपि च बहुतमसा रौद्रचेष्टा हि रौद्राः॥ ७ ॥

बाणं नानायुधोग्रं पुनरभिपतितं दर्पदोषाद्वितन्वन्
    निर्लूनाशेषदोषं सपदि बुबुधुषा शङ्करेणोपगीतः।
तद्वाचा शिष्टबाहुद्वितयमुभयतो निर्भयं तत्प्रियं तं
    मुक्त्वा तद्दत्तमानो निजपुरमगमः सानिरुद्धः सहोषः॥ ८ ॥

मुहुस्तावच्छक्रं वरुणमजयो नन्दहरणे
    यमं बालानीतौ दवदहनपानेऽनिलसखम्।
विधिं वत्सस्तेये गिरिशमिह बाणस्य समरे
    विभो विश्वोत्कर्षी तदयमवतारो जयति ते॥ ९ ॥

द्विजरुषा कृकलासवपुर्धरं नृगनृपं त्रिदिवालयमापयन्।
निजजने द्विजभक्तिमनुत्तमामुपदिशन् पवनेश्वर पाहि माम्॥ १० ॥

**********